र्व

मीमांसा संग्रहः

[illegible]

5369

F. 15

सरकार पंडत गंगाराम नय
गुर्याई दिता उस
मून बलोवार्ई दिता

ॐ श्रीगणेशाय नमः श्रीसरस्वत्यै नमः श्रीतारकब्रह्मानंदसरस्वतीचरणा
कमलेभ्यो नमः वासुदेवं रमाकांतं नत्वा लौगाक्षिभास्करः कुरुते जैमिनिनये प्रवे
शायार्थसंग्रहं ॥ अथ परमकारुणिको भगवान् जैमिनिर्धर्मविवेकाय द्वादशलक्ष
णीं प्रणिनाय तत्रादौ धर्मजिज्ञासां सूत्रयामास अथातो धर्मजिज्ञासेति अत्राथ
शब्दो वेदाध्ययनानंतर्यवचनः अतःशब्दो हि वेदाध्ययनस्य दृष्टार्थत्वं ब्रूते स्वाध्यायो
ध्येतव्य इत्यध्ययनविधौ तदध्ययनस्यार्थज्ञानरूपदृष्टार्थकत्वेन व्यवस्थापनात् तथा
च वेदाध्ययनानंतरं यतोर्थज्ञानरूपदृष्टार्थकं तदध्ययनमतो हेतोर्धर्मस्य वेदा
र्थस्य जिज्ञासा कर्तव्येति वाक्यार्थः जिज्ञासा वेदे च विचारलक्षणातो धर्मविचारशास्त्र
इतीयमि मिदमारम्भं सूत्रार्थः अथ को धर्मः किं तस्य लक्षणमिति चेदुच्यते यागादिरेव धर्मः
तिप्रा तल्लक्षणं वेदप्रतिपाद्यप्रयोजनवदर्थो धर्म इति प्रयोजने इति व्याप्तिवारणाय प्रयो
त्तारम्भ जनवदिति भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्य इति पुनरर्थपदं फलके नादनर्थ
स्ये श्येनादावतिव्याप्तिवारणायेति नच चोदनालक्षणोर्थो धर्म इति सूत्रल
दे दशाविरोधः चोदनापदस्य विधिरूपवेदैकदेशपरत्वादिति वाच्यम् तत्रैव चोदनाशब्द
स्य वेदमात्रपरत्वात् सर्वस्य वेदस्य धर्मतात्पर्यकत्वेन धर्मप्रति ॥ ॥ ॥ ॥ ॥

पादकत्वात् स च यागादिर्यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य पुरुषंप्रति विधीयते तथा हि यजे
तेत्यत्र ऽस्त्यंशद्वयं यजिधातुः प्रत्ययश्च प्रत्ययेपि ऽस्त्यंशद्वयमाख्यातत्वं लिङ्त्वं च तत्राख्यातत्वं
दशलकारसाधारणम् लिङ्त्वं पुनर्लिङ्मात्रे उभाभ्यामप्यंशाभ्यां भावनैवोच्यते भावनानाम भवितु
र्भवनानुकूलो भावयितुर्व्यापारविशेषः साद्विधा शाब्दी भावना ऽऽर्थी भावना चेति तत्र पुरुषप्रवृत्त्य
नुकूलो भावयितुर्व्यापारविशेषः शाब्दी भावना सा च लिङंशेनोच्यते लिङ्श्रवणे ऽयं मां प्रव
र्तयति मत्प्रवृत्त्यनुकूलव्यापारवानिति नियमेन प्रतीतेर्यद्यस्माच्छब्दान्नियमतः प्रतीयते त
त्तस्य वाच्यं यथा गामानयेत्यस्माद्वाक्याद्गोशब्दस्य गोत्वं स च व्यापारविशेषो लौकिकवाक्ये
पुरुषनिष्ठोऽभिप्रायविशेषः वैदिकवाक्ये तु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव अत एव
शाब्दी भावनेति व्यवह्रियते सा च भावना ऽंशत्रयमपेक्षते साध्यं साधनमिति कर्त्तव्यतां च किं भाव
येत् केन भावयेत् कथं भावयेदिति ~~कथं भावयेदिति~~ तत्र साध्याकांक्षायां वक्ष्यमाणांशत्रयोपे
ता ऽर्थी भावना साध्यत्वेनान्वेति एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः संख्यादी
नामेकप्रत्ययगम्यत्वेपि ऽयोग्यत्वात् न साध्यत्वेनान्वयः साधनाकांक्षायां लिङादिज्ञानं
करणत्वेनान्वेति न तस्य च करणत्वं भावनोत्पादकत्वेन तत्पूर्वमपि तस्याः सत्त्वात् किं तु

ध्या

मीमांसा २ 2

भावनाज्ञापकत्वेन शब्दभावना भाव्यनिर्वर्तकत्वेन वा इतिकर्तव्यताकांक्षायामर्थवादज्ञाप्यप्राशस्त्यज्ञानमि
तिकर्तव्यतात्वेनान्वेति प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थीभावना सैवाख्यातत्वांशेनोच्यते आ
ख्यातसामान्यस्य व्यापारवाचित्वात् साप्यंशत्रयमपेक्षते साध्यं साधनमितिकर्तव्यतां च किं भावयेत् केन
भावयेत् कथं भावयेदिति तत्र साकांक्षायां स्वर्गादिफलं साध्यत्वेनान्वेति साधनाकांक्षायां यागादि
करणत्वेनान्वेति इतिकर्तव्यताकांक्षायां प्रयाजाद्यङ्गजातमिति कर्तव्यतात्वेनान्वेति अथ को
वेद इति चेत् उच्यते अपौरुषेयं वाक्यं वेदः स च विधिमन्त्रनामधेयनिषेधार्थवादभेदात्पञ्च
विधः तत्राज्ञातार्थज्ञापको वेदभागो विधिः स च प्रयोजनवदर्थविधानेनार्थवान् तादृशं चा
र्थं प्रमाणान्तरेणाप्राप्तं विधत्ते यथाग्निहोत्रं जुहुयात्स्वर्गकाम इति विधिर्मानान्तरेणाप्रा
प्तस्वर्गप्रयोजनवद्धोमं विधत्ते अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः यत्र कर्म मा
नान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते यथा दध्ना जुहोतीत्यत्र होमस्याग्निहोत्रं जुहु
यादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानं दध्ना होमं भावयेदिति यत्र तूभयम
प्राप्तं तत्र विशिष्टं विधत्ते यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयाग
विधानं सोमपदे मत्वर्थलक्षणया सोमवता यागे ॥

नेष्टं भावयेदिति वाक्यार्थबोधः न चोभयविधाने वाक्यभेदः प्रत्येकमुभयस्याविधाना
त् किंतु विशिष्टस्यैव विधानात् न च ज्योतिष्टोमेन स्वर्गकामो यजेतेति विधिप्राप्तयो
गोद्देशेन सोमरूपगुणविधानमेवास्तु सोमेन यागं भावयेदिति किं मत्वर्थलक्षणये
ति वाच्यं तस्याधिकारविधित्वेनोत्पत्तिविधित्वासंभवात् न च उद्भिदा यजेत पशुकाम इ
त्यस्येव ज्योतिष्टोमेनेत्यस्याप्युत्पत्त्यधिकारविधित्वमस्त्विति चेन्न दृष्टान्ते उत्पत्तिवा
क्यान्तराभावेनान्यथानुपपत्त्या तथात्वाश्रयणात् किंच ज्योतिष्टोमेनेत्यस्योभय
विधित्वेऽनेनैव यागस्य फलसंबन्धोऽपि बोधनीय इति सद्वंद्वं वाक्यभेदस्तद्वरं सोमप
दे मत्वर्थलक्षणया विशिष्टविधानं विधिस्तु चतुर्विधः उत्पत्तिविधिर्विनियोगवि
धिरधिकारविधिः प्रयोगविधिश्चेति तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः
यथाग्निहोत्रं जुहोतीति अत्र च विधौ कर्मणः करणत्वेनान्वयः अग्निहोत्रहोमेने

मी॰ सा॰
२

होमं भावयेदिति ननु यागस्य हि रूपे द्रव्यं देवता च तयोश्च रूपाप्राप्तावग्निहोत्रं जुहोतीति कथमुत्प
त्तिविधिः अग्निहोत्रशब्दस्य तु तत्प्रख्यन्यायेन नामधेयत्वादिति चेन्न रूपाप्राप्तस्याप्युत्प
त्तिविधानात् अन्यथा रूपप्राप्तेर्दध्ना जुहोतीत्ययमेवोत्पत्तिविधिः स्यात् तथा चाग्नि
होत्रं जुहोतीति वाक्यमनर्थकं स्यात् अंगप्रधानसंबंधबोधको विधिर्विनियोगविधिः य
था दध्ना जुहोतीति स हि तृतीयाप्रतिपन्नांगभावस्य दध्नो होमसंबंधं विधत्ते दध्ना होमं भावयेदिति गु
णविधौ च धात्वर्थस्य साध्यत्वेनैवान्वयः क्वचिदाश्रयत्वेनापि यथा दध्नेन्द्रियकामस्य जुहुयादित्यत्र
दधिकरणकत्वेनेन्द्रियं भावयेत् तच्च किं निमित्तमित्याकांक्षायां सन्निधिप्राप्तहोम आश्रयत्वेना
न्वेति एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि श्रुतिलिंगवाक्यप्रकरणस्थानसमा
ख्यारूपाणि एतत्सहकृतेनानेन विधिनांगत्वं परोद्देशप्रवृत्तकृतिसाध्यत्वरूपं पारार्थ्याप
रपर्यायं ज्ञाप्यते तत्र निरपेक्षो रवः श्रुतिः सा च त्रिविधा विधात्री अभिधात्री विनियोक्त्री चे
ति तत्र विधात्री लिंगाद्यात्मिका अभिधात्री व्रीह्यादिश्रुतिः यस्य च शब्दस्य श्रवणादेव संबंधः प्र
तीयते सा विनियोक्त्री सापि त्रिविधा विभक्तिरूपा एकाभिधानरूपा एकपदरूपा चेति तत्र विभक्ति
श्रुत्यांगत्वं यथा व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागांगत्वं तद्यपि पुरोडाशप्रकृतितया यथा पशोर्हृदया
दि स्वप्यहविः प्रकृतितया यागांगत्वं आरुणया पिंगाक्ष्यैकहायन्या गवा सोमं क्रीणातीत्यत्रास्मिन्वाक्ये आरुण्यस्यापि

व्रीतिप्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयया श्रुत्या न तु प्रोक्षणेन व्रीहिस्वरूपार्थं तस्य तेन विनाप्युपपत्तेः किं त्वपू
र्वसाधनत्वप्रयुक्तं व्रीहीणां प्रोक्षणं यागानुष्ठानेऽपूर्वानुपपत्तेः एवं सर्वेष्वङ्गेषु अपूर्वप्रयुक्तमङ्गत्वं बोध्यम् एवमभिमा
हृत्य पत्नीमत्र स्त्रीत्वस्याभिधानीमासत्त्वस्य द्वितीयाश्रुत्यामत्र स्याभिधानाङ्गत्वं ग्रहाहवनीये जुहोतीत्याहव
नीयस्य होमाङ्गत्वं सप्तमीश्रुत्या एवमन्यापि श्रुत्या विनियोगो ज्ञेयः पशुना यजेतेत्यत्रैव तृतीयया पशोः समानाधा
नश्रुत्या कारकांशाङ्गत्वं यजेतेत्याख्यातेनाभिहितसंख्याया भावनाङ्गत्वं समानाभिधानश्रुतेरेव पदश्रुत्या च
यागाङ्गत्वं न वा मृतीयाश्रुत्या एवं भावनाङ्गत्वं कर्तृत्वपरिच्छेदद्वारा नतूपपत्तेः कर्ता वा देयलभ्यः प्राख्या
तेन हि भावनोच्यते सा च कर्तारं विनानुपपन्नेति तमाक्षिपतीत्येयं श्रुतिर्लिङ्गादिभ्यः प्रबला लिङ्गादिषु
न प्रत्यक्षो विनियोजकः शब्दोऽस्ति किं तु कल्प्यः यावच्च तैर्विनियोजकः शब्दः कल्प्यते तावत् प्रत्यक्षया श्रुत्या
विनियोगस्य कृतत्वेन तेषां कल्पकत्व प्राप्ते व्याहतत्वात् एवं सर्वत्र लिङ्गादिभ्यः श्रुतेः प्राबल्यं किं लिङ्गं ऐ
न्द्र्या गार्हपत्यमुपतिष्ठते इत्यत्र गार्हपत्यमिति द्वितीयया श्रुत्या गार्हपत्योपस्थानार्थत्वं शब्दसामर्थ्यं
लिङ्गं तेनाहुः सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते इति सामर्थ्यं रूढ्यैव समाख्यातो नामेन्द्रः। १

तेन बर्हिर्देवसदनं दामीति मंत्रस्य कुशालवनांगत्वेन तल्लवनगतिलवनांगत्वेन तस्य बर्हिर्दामीति लिंगात्
कुशालवने प्रकाशयितुं समर्थत्वात् तृणवमन्यत्रापि लिंगाद्विनियोगो द्रष्टव्यः। तदिदं नावकाशादिभ्यो बलवत्
मी. ४ गृत एवं स्योनं ते सदनं कृणोमीति मंत्रस्य पुरोडाशसदनकरणांगत्वे सदने कृणोमीति लिंगात्। ननु वा
सा. क्यात् समभिव्याहारस्य साधयत्वादिवाक्यस्यैतीयार्थाभावोपि बलवत्त्वं। प्रोच्य शेषि वाक्य पदयोः सहोच्चार
णाद्यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्यत्र पर्णजुह्वोः समभिव्याहारादेव पर्णता
५ याः जुह्वंगत्वं न वाक्येन जुह्वाः अहित्वादिति वाच्यं जुहूशब्देन तत्साध्यापूर्वलक्षणात् तथा च वाक्या
र्थः पर्णता यागसाधनहविर्धारणद्वारा जुहूद्वारेण भावयेत् एवं च पर्णतया यदि जुह्वाः क्रियते तदैव तत्सा
ध्यमपूर्वं भवति नान्यथेति गम्यते इति न पर्णताया वैयर्थ्यं अत्र तु हविर्धारणद्वारेति वा
क्यं वक्तव्यम् अन्यथा स्रुवादिष्वपि पर्णतापत्तेः। सेयं पर्णता अनारभ्याधीतापि सर्वत्र प्रकृ
तिष्वेवान्वेतीति न विकृतिषु तत्र चोदकेनापि तत्प्राप्तिसंभवान्नैमित्तिकत्वापत्तेः। यत्र समानं नामोपदेशः सात्र सक्तिः॥

यथा दर्शपूर्णमासादिः तत्प्रकरणे सर्वांगपाठात् यत्र न समग्रांगोपदेशः सा विकृतिः यथा सौर्यादिः तत्र कृतिप
कांगानामतिदेशेनापि प्राप्तत्वात् शुनारभ्यविधिः सामान्यविधिः तदिदं वाक्यं प्रकरणादिभ्यो बलवत् यत एवेंद्रा
ग्निमिदं हविरित्यादेरेकवाक्यत्वाद् दर्शांगत्वं न तु प्रकरणाद् दर्शपूर्णमासांगत्वम् उभयाकांक्षा प्रकरणम् यथा प्र
याजादिषु समिधो यजतीति वाक्ये फलविशेषस्यानिर्द्देशात्तस्यापि धान्तेन भावयेदिति बोधानंतरं किमित्युपकार्याका
कांक्षा दर्शपूर्णमासवाक्येपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेदिति बोधानंतरं कथमित्युपकारकाकांक्षा इत्थं चो
भयाकांक्षया प्रयाजादीनां दर्शपूर्णमासांगत्वं तच्च प्रकरणं द्विविधम् महाप्रकरणमवांतरप्रकरणं चेति ॥
तत्र मुख्यभावनासंबंधि प्रकरणं महाप्रकरणं तेन च प्रयाजादीनां दर्शपूर्णमासांगत्वं एतच्च प्रकृतावेव
उभयाकांक्षायाः संभवात् न तु विकृतौ प्रकृतिवद्विकृतिः कर्तव्येत्यतिदेशेन कथंभावनाकांक्षाया उपशमे
नापूर्वांगानामपि उभयाकांक्षया विनियोगासंभवात् तस्मादपूर्वांगानां स्थानादेव विकृत्यर्थत्वमिति
अंगभावनासंबंधि प्रकरणमवांतरप्रकरणं तेन चाभिक्रमणादीनां प्रयाजाद्यंगत्वं तच्च संदंशेनैव ज्ञायते
तदभावे चाविशेषात्सर्वेषां फलभावनाकथंभावेन ग्रहणप्रसंगेन प्रधानांगत्वापत्तेः एकांगानुवादेन विधी

यमानयोरप्यंगयोरंतराले विहितत्वसंदेहः यथाभिक्रमणे तद्धि समानयत्र उपभृतस्तेजो वा इत्या-
दिविधिना प्रयाजानुवादेन किंचिदंगं विधाय विधीयते तदनंतरमपि प्रयाजानुवादेन प्रयाजत्वं यस्यैवं
विदुषः प्रयाजा इज्यंते प्रैभ्यो लोकेभ्यो भ्रातृव्यान्नुदते अभिक्रामं जुहोत्यभिजित्यै यो वै प्रयाजादीनां वेदस्यादिना
किंचिदंगं विधाय विधीयते सः प्रयाजानामध्ये विहितमभिक्रमणे तदंगं प्रयाजैरपूर्वं कृत्वा यागोपकारं भाव-
येदिति ज्ञाते कथमेभिरपूर्वं कर्तव्यमिति कथंभावाकांक्षायाः सत्वात् सा च संदेहापत्तितैरभिक्रमणादिभिः
शाम्यति न चांगभावनायां कथंभावाकांक्षाभावः भावनासामान्येन तत्रापि तत्संभवात् तदिदं प्रकरणं क्रि-
यायाएव साक्षाद्विनियोजकं द्रव्यगुणयोस्तु तद्द्वारा तथाहि यजेत स्वर्गकाम इत्यत्र फलभावनायां कथंभा-
वाकांक्षायां सन्निधिपठितान्यन्यात्मकफलकं क्रियाजातमुपकार्याकांक्षयेतिकर्तव्यतात्वेनान्वेति क्रियाया एव लो-
के कथंभावाकांक्षायामन्वयदर्शनात् न हि कुठारेण छिंद्यादित्यत्र कथंभावाकांक्षायामुद्यम्यमाणोपि हस्तो-
न्वेति किंतु हस्तेनोद्यम्य निपात्येति उद्यमननिपातन एव हस्तस्य तद्द्वारेणान्वेतीति सार्वजनीनमेतत् इदं च
स्थानादिभ्यो बलवत् अत एवाहे दीक्षयति राजन्यमिति विदेवनादयो धर्मा अभिषेचनीयसान्निध्ये पठिता

श्वपि स्थानान्तरं देशं किन्तु प्रक्रमस्य द्वाजरूपं गमितिदेशसामान्ये स्थाने तद्द्विविधं पाठसादेश्यम
नुष्ठानसादेश्यं चेति स्थानक्रमश्चेत्यनयोरन्तरं पाठसादेश्यमपि द्विविधं यथासंख्यं पाठः सन्निधिः
पाठश्चेति तत्रैन्द्राग्नमेकादशकपालं निर्वपेद्वैश्वानरं द्वादशकपालं निर्वपेदित्येवं क्रमविहितेषु
इन्द्राग्नी रोचनादिव इत्यादीनां याज्यानुवाक्यामन्त्राणां यथासंख्यं प्रथमस्य प्रथमे द्वितीयस्य द्वितीय
मित्येवंरूपो विनियोगो यथासंख्यापाठात् प्रथमपठितमन्त्रस्य हि देशः प्राथम्याकान्तानां प्रथमतो विहि
तेकर्मैव प्रथमानुपतिष्ठते समानदेशत्वात् एवं द्वितीयमन्त्रस्यापि वैकृतानां गानानां प्राकृतानामनुवादेन विहि
तानां संदेशपतितानां विकृत्यर्थत्वं सन्निधिपाठात् यथाऽग्नीषोमानानेयांगिकैमध्याकांक्षायां फलविकृत्यप्र
वेमेव भाव्यत्वेन सम्बध्यते नुपस्थितत्वात् स्वानन्तरफलकत्वे विकृतिसन्निधिपाठान्न चैवमापन्ने: पशुपश्मात्य
मग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात् औपवसथ्येह्यग्नीषोमीयः पशुरनुष्ठीयते तस्मिन्नेव दिने तद्धर्माः
पशूतेग्रतस्मिन्नेवाङ्केमध्याकांक्षायां सन्निहितत्वेनोपस्थिते पशावेवमेव भावनेन सम्बध्यते तत्र स्थानस
माख्यातः प्रबलं मतएव पुनर्मन्त्रः सान्नाय्यपात्राणां पाठसादेश्यात् ननु पौरोडाशिकमिति समा
ख्यायापुरोडाशपात्राणां समाख्या यौगिकः प्राकृः सा हि द्विविधा वैदिकी लौकिकी तत्र होतृचमसमभक्षणां

लौकिकी

मी॰मा त्वं होत्रचमस इति वैदिकसमाख्यया अध्वर्योस्तत्तत्पदार्थांगत्वं लौकिक्याध्वर्यवमिति समाख्ययेति सं
५ क्षेपः तदेवं निरूपितानि संक्षेपतः श्रुत्यादीनि षट्प्रमाणानि एतत्सहकृतेन विनि विधिना समिदा योग
दिभिरूपकारदर्शपूर्णमासाभ्यां यजेतेत्येवंरूपेण या विनियोज्यंते तान्यंगानि द्विविधानि सिद्ध
6 रूपाणि क्रियारूपाणि चेति तत्र सिद्धानि जातिद्रव्यसंख्यादीनि तानि च दृष्टार्थान्येव क्रियारूपा
णि च द्विविधानि गुणकर्माणि प्रधानकर्माणि च एतान्येव सन्निपत्योपकारकाण्यारादुपका
रकाणि चोच्यन्ते कर्मांगद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकं यथावघातप्रो
क्षणादि तच्च दृष्टार्थमदृष्टार्थं दृष्टादृष्टार्थं चेति दृष्टार्थमवघातादि अदृष्टार्थं प्रोक्षणादि दृष्टादृष्टार्थं
पशुपुरोडाशयागादि तद्धि द्रव्यत्यागांशेनैवादृष्टार्थं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति द्रव्याद्यनु
द्दिश्य केवलं विधीयमानं कर्मारादुपकारकं यथा प्रयाजादि आरादुपकारकं च परमापूर्वोत्पत्तावे
वोपयुज्यते सन्निपत्योपकारकं तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपोत्पत्तावुपयुज्यते इदमेव चाज्ञापिक
र्मेत्युच्यते तदेवं निरूपितः संक्षेपतो विनियोगविधिः प्रयोगप्राशुभावबोधको विधिः प्रयोगवि
धिः स चांगवाक्यैकवाक्यतापन्नः प्रधानविधिरेव स हि सांगप्रधा

नमनुष्ठापयन्नविलंबे प्रमाणाभावादविलंबापरपर्यायं प्रयोगप्राशुभावं विधत्ते न च तद्विलंबेपि प्र
माणाभाव इति वाच्यम् विलंबे ह्यंगप्रधानोद्देश्यकवाक्यात्तावज्जन्नतत्साहित्यानुपपत्तेः विलंबेनैकप्रम
योगः पदार्थयोः इदमनेन सह कर्तव्यमिति साहित्यं व्यवहारमात्रं स चाविलंबेन निष्पत्ते क्रमे सत्युपपद्यमा
नमवति अतश्चाविलंबे एतदनंतरमेतत्कर्तव्यमेतदनंतरं वेति प्रयोगविधेः पापत्तेः पुनः प्रयोगविधिरेव
त्वाविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषणत्वेनाविधत्ते अत एवांगानां क्र
मबोधको विधिः प्रयोगविधिरित्यपि लक्षणम् तत्र क्रमो नाम विततादिरूपो पौर्वापर्यरूपो वा तत्र षट्प्र
माणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि तत्र क्रमपरं वचनं श्रुतिः तत् द्विविधं केवलक्रमपरं
तद्विशिष्टपदार्थपरं चेति तत्र वेदं कृत्वा वेदिं करोतीति केवलक्रमपरं वेदिकरणादेर्वचनान्तरप्राप्तत्वात्
वषट्कर्तुः प्रथमभक्ष इति तु क्रमविशिष्टपदार्थपरं भक्षस्याप्राप्तत्वेन क्रममात्र
विधातुमशक्यत्वात् इयं च श्रुतिरितरप्रमाणापेक्षया बलवती तेषां वचनकल्पनद्वारा क्रमप्रमाण
त्वात् अत एवाग्निहोत्रहवण्याः पाठक्रमात्पूर्वं स्थानेनाग्निहोत्रहवणीं गृह्णीयादिति वचनात् प्रथमोपस्थितत्वेऽपि
नात् इदमस्याग्रहणमिति युक्तम् प्रयोजनवशेन यः क्रमो निर्णीयते सोऽर्थक्रमः यथाग्निहोत्रं
जुहोति यवागूं पचतीति अत्र हि यवाग्वा होमार्थत्वेन तत्पाकः प्रयोजनव
शेन पूर्वमनुष्ठीयते स चायं पाठक्रमाद्बलवान् यथापाठं ह्यनुष्ठानेनोपक्रमप्रयोजनवाधोऽर्थह

ञार्थत्वं च स्मात् नहि होमानंतरं क्रियमाणस्य पाकस्य किंचिद्दृष्टं प्रयोजनमस्ति पदार्थबोधकवाक्यानी
यः क्रमः स पाठक्रमः तस्माच्च पदार्थानां क्रमश्चाश्रीयते येन हि क्रमेण वाक्यानि पठितानि तेनैव क्रमे
णाधीतान्यर्थप्रत्ययं जनयंति यथाप्रत्ययं च पदार्थानामनुष्ठानं स च पाठो हि द्विविधो मंत्रपाठो ब्रा
ह्मणपाठश्चेति तत्राग्नेयाग्नीषोमयोस्तत्र धीऽस्यानुवाक्याद्यः क्रमश्चाश्रीयते स मंत्रपाठात् स
स्वार्थं मंत्रपाठो ब्राह्मणपाठात् बलीयान् मंत्रस्यानुष्ठाने ब्राह्मणवाक्यापेक्षया मंत्रपाठस्यांतरंगत्वा
त् ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेव वेदं करोत्यं इति अयबोध्यकृत्यार्थंमज्ञाः पुनः प्रयोगकाले व्या
प्रियंते मनुष्ठानक्रमस्य स्मरणक्रमाधीनत्वा तत्क्रमस्य च मंत्रक्रमाधीनत्वादंतरंगो मंत्रपाठ
इति प्रयाजादीनां समिधो यजति तनूनपातं यजति इत्येवंविधवाक्यक्रमाद्यः क्रमः स ॥
ब्राह्मणपाठक्रमात् यद्यपि ब्राह्मणवाक्यान्यर्थविधायकत्वार्थानि तथापि प्रयाजा
दीनां क्रमस्मारकांतरस्याभावात्तान्येव क्रमस्मारकत्वेन स्वीक्रियंते स्थाननामोपस्थितिः
यस्मिन्हि देशेऽनुष्ठीयते तत्रैव तन्नेव पदार्थे कृते स एव प्रथममुपस्थितो भवतीत्युक्तं तस्य
प्रथममनुष्ठानमत एवसायस्के रग्नीषो ॥

मीयसवनीयानुवंध्यानां सवनीयदेशे सहानुष्ठाने कर्त्तव्ये आदौ सवनीयपशोरनुष्ठानं इतरयोः
पश्चात् तस्मिन्देशे आश्विनग्रहणानंतरं सवनीयस्यैव प्रथममनुपस्थितेः तथाहि ज्योतिष्टोमे त्रयः प
शुयागाः अग्नीषोमीयः। सवनीयः। आनुवंध्यश्चेति ते चाभिन्नदेशाः औपवसथ्येऽह्नि सवनीयः
सुत्याकाले अनुवंध्यस्त्वंते साद्यस्को नाम सोमयागविशेषः स चाग्निष्टोमविकारोऽतस्ते
त्रयोऽपि पशुयागाः साद्यस्के चोदकप्राप्तास्तेषां च तत्र साहित्यं श्रुतं सह पशूनालभेत इति तत्र सा
हित्यं सवनीयदेशे तस्य प्रधानप्रत्यासत्तेः स्थानातिक्रमसामर्थ्याच्च सवनीयदेशे सहानुष्ठाने ऽग्नीषो
मीयानुवंध्ययोः स्वस्वस्थानाद्विक्रमो भवति अग्नीषोमीयदेशे आनुवंध्यदेशे चानुष्ठाने त्रयाणा
मपि स्वस्वस्थानातिक्रमः तथा च प्रकृतावाश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय सवनीयं प
शुमुपाकरोतीत्याश्विनग्रहणानंतरं सवनीयो विहित इति साद्यस्के त्वाश्विनग्रहणे कृते सव
नीय एवोपस्थितो भवतीति युक्तं तस्य स्थानात्प्रथममनुष्ठानं इतरयोस्तु पश्चादित्युक्तक्रम प्रथा

सापेक्षतयाविलंवितप्रतिपत्तिकः पाठक्रमस्तु निरपेक्षतयाऽवाध्याय पाठक्रममात्र ९

मी॰ ८ नक्रमेणांगानां क्रमः स मुख्यक्रमः येन हि क्रमेण प्रधानानि क्रियंते तेनैव क्रमेण तेषामंगा
न्यनुष्ठीयंते तदा सर्वेषामंगानां स्वैः स्वैः प्रधानैस्तुल्यं व्यवधानं भवति व्युत्क्रमेणानुष्ठाने
8 केषांचिदंगानां स्वैः प्रधानैरत्यंतमव्यवधानं केषांचिदत्यंतं व्यवधानं स्यात्तच्चायुक्तं प्रयो
गविध्यवगतसाहित्यबाधापत्तेः अतः प्रधानक्रमोप्यंगक्रमे हेतुः अत एव प्रयाजशेषेण
दार्वाग्नेयपुरोडाशयोरभिघारणं पश्चादैंद्रस्य दध्नः आग्नेयैंद्रयागयोः पौर्वापर्यात एवं च द्वयो
रप्यभिघारणयोः स्वस्वप्रधानेन तुल्यमेकांतरितं व्यवधानं व्युत्क्रमेणाभिघारणे त्वा
ग्नेयहविरभिघारणाग्नेययागयोरत्यंतमव्यवधानं ऐंद्रदध्यभिघारणैंद्रयागयोर्द्व्यंतरितं व्यव
धानं तच्चायुक्तमिति सच मुख्यक्रमः पाठक्रमाद्दुर्बलः मुख्यक्रमो हि प्रमाणांतरसापेक्षप्रधान
क्रमप्रतिपत्तिसापेक्षतया न तथेति प्रवृत्तिक्रमो हि बहूनां प्रधानानां प्रकर्षात मुख्यक्रमे तु सत्येके
र्वीत सहप्रयुज्यमानेषु प्रधानेषु सांनिपातिनामंगानामावृत्त्यानुष्ठाने कर्तव्ये द्वितीयादिपदार्था
नां प्रथमानुष्ठितपदार्थक्रमात्क्रमः स प्रवृत्तिक्रमः यथा प्राजापत्यपश्वंगेषु प्राजापत्या ॥ ८

हि वैश्वदेवीं कृत्वा प्राजापत्यैश्चरंतीति चोदनेन नैमित्तिकानां निर्दिष्टत्वात्तेषां कर्तव्यता का एककालत्वेन विहिता एवं तेषां
तदंगानां चोपाकरणानियोजनप्रभृतीनां साहित्यं संबद्धं तत्र प्राजापत्यपशूनां संज्ञप्तिपर्यंतं देवतात्वेन युगपदनुष्ठा
नानुपपद्यते तदंगानां चोपाकरणादीनां प्रत्येकमनुष्ठानमशक्यं एवं तेषां साहित्यमवश्यं विहितानुष्ठानां तंत्रे
तत्रैकस्योपाकरणं विधाय परस्योपाकरणं विधेयं एवं च नियोजनादिकमपि तथा च प्राजापत्येषु कल्पोक्तित
स्तांत्रस्य एकत्वेनानुष्ठाय द्वितीयादिः पदार्थस्तेनैव क्रमेणानुष्ठेयः स च क्रमः स्थानं मुख्यादिभ्यो दुर्बलः
तदेवं संक्षेपतो निरूपितः प्रयोगविधिः कर्मजन्यफलस्वाम्यबोधको विधिरधिकारविधिः कर्मजन्यफलस्वाम्यं कर्म
जन्यफलभोक्तृत्वं स च यजेत स्वर्गकाम इत्यादिरूपः स्वर्गमुद्दिश्य यागं विदधतानेन स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्र
तिपाद्यते यस्याहिताग्नेरग्निर्गृहान्दहेत्सोऽग्नये क्षामवतेऽष्टाकपालं निर्वपेदित्यादिनाग्निदाहहेतुनिमित्तेन कर्मविद
धता निमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते एवमहरहः संध्यामुपासीतेत्यादिनाप्यविवि
हितकालजीवितः संध्योपासनजन्यप्रत्यवायपरिहाररूपफलस्वाम्यं बोध्यते नन्वत्र फलस्वाम्यं नत्वे

वचोधिकारविशिष्टः अधिकारश्च सर्वत्र यद्बुद्धिवाक्ये पुरुषविशेषणत्वेन श्रूयते यथा कामो कर्मेति फलकामना नैमि
त्तिकं कर्मेति निमित्तनिश्चयः नित्येषु ध्योवासना हि नविविहितकालजीवित्वं अत एव राजा राजसूयेन स्वाराज्यकामो यजे
१ तेत्यनेन विधिना कोपि न स्वाराज्यमुद्दिश्य विदधतापि न स्वाराज्यकाममात्रस्य न फलभोक्तृत्वं प्रतिपाद्यते किंतु राज्ञः
सतः स्वाराज्यकामस्यैव राजन्यस्यापि अधिकारो विशेषणत्वेन श्रवणात् किंचित्तु पुरुषविशेषणत्वेनाश्रुतमप्य
धिकारिविशेषणं यथाऽध्ययनविधिसिद्धाविद्या ऋत्वर्थीनो अर्थज्ञानापेक्षत्वात् लोपयतेनाध्ययनविधिसिद्धा
र्थज्ञानवन्तं प्रत्येव प्रवृत्तेः एवमग्निसाध्यकर्मसु आधानसिद्धाग्निमत्ता अग्निसाध्यकर्मणामग्न्यपेक्षत्वेन तद्वि
धीनामाधानसिद्धाग्निमन्तं प्रत्येव प्रवृत्तेः एवं सामर्थ्यमपि अध्याहृतानामर्थं ब्रुवतां शक्तिः सहकारित्वात्
सामर्थ्यं प्रत्येव विधिप्रवृत्तेः तदेवं निरूपितो विधिः प्रयोगविधि समवेतार्थस्मारका मन्त्राः ते चोच्यताः शास्त्रे स्मारकत्वेन
गार्थवत्त्वं ननु नदृष्टा स्मरणादृष्टार्थत्वं भवति दृष्टफलत्वे ऽदृष्टकल्पना वाऽन्याय्यत्वात् न च दृष्टप्रत्यार्थस्मरणस्य
प्रकारान्तरेणापि संभवात् मन्त्रास्नाने वैयर्थ्यमिति वाच्यम् मन्त्रैरेव स्मर्तव्यमिति नियमविधानश्रवणात्

नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः
यथाहुः विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते इति
अस्यार्थः प्रमाणान्तरेणाप्राप्तस्यानेन विधानात् पक्षेऽप्राप्तस्य प्रापको विधिर्नियमविधिः यथा
व्रीहीनवहन्तीत्यादिः कथमस्य पक्षेऽप्राप्तस्य प्रापकत्वमिति चेदित्थम् अनेन हि अवघात
स्य वैतुष्यार्थत्वं न प्रतिपाद्यते अन्वयव्यतिरेकसिद्धत्वात् किन्तु नियमः स चाप्राप्तांशपूरणेन
वैतुष्यं हि नानोपायसाध्यत्वात् यदावघातं परित्यज्योपायान्तरं गृहीतुमारभते तदावघात
स्याप्राप्तत्वेन तद्विधानं नामकमप्राप्तांशपूरणमेवानेन विधिना क्रियते अतश्चायं नियमविधि
र्न प्राप्तांशपूरणात्मको नियम एव वाक्यार्थः पक्षेऽप्राप्तविधानमिति यावत् उभयोश्च युगप
त्प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्याविधिः यथा पञ्च पञ्चनखा भक्ष्या इति इदं हि वाक्यं न पञ्च
नखभक्षणपरं तस्य रागतः प्राप्तत्वात् नापि नियमपरं पञ्चनखापञ्चनखभक्षणस्य युगपत्प्राप्तेः प
क्षेऽप्राप्त्यभावात् अत इदं अपञ्चनखभक्षणनिवृत्तिपरमिति भवति परिसंख्याविधिः सोऽपि विधि

श्रौतीलाक्षणिकीच तत्राद्या हि वावयंतीति श्रौती संख्या एवकारेण पवमानातिरिक्तेत्र व्याहृते
रभिधानात् पंचपंचनखा भक्ष्या इति तु लाक्षणिकी इतरनिवृत्तिवाचकपदाभावात् अत एवं
परिसंख्यायां दोषत्रयं च श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति तदुक्तं श्रुतार्थस्य परि-
त्यागादश्रुतार्थस्य कल्पनात् प्राप्तस्य बाध इत्येवं परिसंख्या त्रिदूषणेति श्रुतार्थस्य पंचनख
भक्षणस्य हानात् अश्रुतापंचनखभक्षणनिवृत्तेः कल्पनात् प्राप्तस्यापंचनखभक्षणस्य बाध-
नादिति अस्मिंश्च दोषत्रये दोषद्वयं शब्दनिष्ठं प्राप्तबाधस्त्वार्थिक इति दिक् येषां तु प्रयोग-
समवेतार्थस्मारकत्वं न संभवति तदुच्चारणस्यानन्यगत्याऽदृष्टार्थत्वं कल्प्यत इति नानर्थक्य-
मिति नामधेयानां च विधेयार्थपरिच्छेदकतयार्थवत्त्वं तथा हि । उद्भिदा यजेत पशुकाम
इत्यत्रोद्भिच्छब्दो यागनामधेयं तेन विधेयार्थपरिच्छेदः क्रियते तथा हि अनेन वाक्येन प्राप्त-
नाप्तत्वादनेन यागो विधीयते यागसामान्यस्याविधेयत्वात् यागविशेष एव विधीयते तत्र कोसौ
यागविशेष इत्यपेक्षायामुद्भिच्छब्दादुद्भिद्रूपो याग इति विज्ञायते उद्भिदा यागेन पशुं भावयेदित्यत्र
समानाधिकरण्येन नामधेयान्वयात् नामधेयत्वं च निमित्तचतुष्टयात् मत्वर्थलक्षणभयात्

श्रीराम
१०

दुद्भिदःस्य यागनामधेयत्वं मत्वर्थलक्षणभयात् तथाहि न तावदनेन केनचित् फलं प्रति यागविधानं संभ
त्ति च गुणविधानं युज्यते वाक्यभेदापत्तेः उद्भिद्गुणसमर्पकत्वे तु यागस्याप्राप्तत्वाद्गुणविशिष्टकर्म
विधानं वाच्यम् उद्भिद्वता यागेन पशुं भावयेदिति विशिष्टविधौ च मत्वर्थलक्षणेत्युक्तमेव चित्रयाय
जेत पशुकाम इत्यत्र चित्राशब्दस्य कर्मनामधेयत्वं वाक्यभेदात् तथाहि न तावदत्र गुणविशिष्टयाग
विधानं संभवति दधि मधु पयो घृतं धाना उदकं तंडुलास्तत्संसृष्टं प्राजापत्यमनेन गुणस्य विहितत्वान्न
द्विशिष्टयागविधानुपपत्तेः यागस्यानूद्य फलसंबन्धे गुणसंबन्धे च विधीयमाने वाक्यभेदस्त
स्माच्चित्राशब्दः कर्मनामधेयम् ॥ तथा च चित्रायागेन पशुं भावयेदिति सामानाधिकरण्येना
न्वयान्न वाक्यभेदः प्रकृतेरनेकद्रव्यात्मकत्वेन चित्राशब्दस्योपपत्तेः अग्निहोत्रं जुहोतीत्य
त्राग्निहोत्रशब्दः कर्मनामधेयमिति सारम् नन्वयं गुणविधिरेवास्तु तेनाग्निर्वाच्य इति चे
न्न यदग्नौ होत्रमस्मिन्निति समासमाश्रित्य होमाधारत्वेनाग्निरूपो गुणो विधेयः तदा य
दाहवनीये जुहोतीत्यनेनैव गतेः प्राप्तत्वान्न विधानानर्थक्यं अग्नये होत्रमिति चतुर्थीसमा
से तत्पुरुषपक्षे तत्प्रख्यशास्त्रापरपक्षस्य विद्यमानत्वादग्निहोत्र
शब्दः कर्मनामधेयम्

मीमं० समाप्तिस्थाग्निदेवताकरूपगुणतोऽनेनाविरोधीयत इति चेन्न तद्देवतायाः शास्त्रान्तरेणाप्राप्तत्वात् किन्तु त
११ च्छास्त्रान्तरमिति चेत् यदग्नये च प्रजापतये च सायं जुहोतीति श्रुतिरेवेति चेत् अपरे तु अग्निर्ज्योतिर्ज्यो
तिरग्निः स्वाहेति मन्त्रवर्णे एवाग्निरूपदेवताप्रापकः नन्वग्नेर्मन्त्रवर्णादित्वे प्रजापतिदेवताबाधः
स्यात् मन्त्रवर्णस्य चतुर्थीतो दुर्बलत्वात् यथाहुः तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः देवता
याविधिस्तत्र दुर्बलं तु परं परमिति चेन्न यदग्नये च प्रजापतये च सायं जुहोतीत्यत्र न केवलं प्रजा
पतिविधानं किन्तु मन्त्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतेः एवं च न बाधः केवलप्रजा
पतिविध्यभावात् न चात्र समुच्चितोभयविधानमेव कथं नेति वाच्यम् समुच्चितोभयविधाना
पेक्षया अन्यतः प्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतिमात्रविधाने लाघवात् एवं प्रयाजे
षु समिधादिदेवतानां सामिधः समिधो अग्न आज्यस्य व्यन्त्वित्यादिमन्त्रवर्णेभ्यः
प्राप्तत्वात् समिधो यजतीत्यादिषु समिधादिपदानां तत्प्रख्यशास्त्रान्नामधेयं श्येनेनाभि
चरन्यजेतेत्यत्र श्येनशब्दस्वरूपे नामधेयत्वे तद्व्यपदेशात्वात् तेन व्यपदेशादुपमानाद
न्यायानुपपत्तेरिति यावत् तथापि यद्विधेयं तत्स्वरूपस्तुतिर्भवति तेन यागश्येनो विधेयः स्यात्

राम

तदार्थवादे तस्यैव स्तुतिः कार्या यथा वै श्येनो निपत्यादत्ते. एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते इत्यने
नैनात्र इत्यनेनार्थवादेन श्येनेन स्तोतुं न शक्यः श्येनेनोपमानेनार्थान्तरस्तुतेः त्रिपमा ग्रात्वात् न च श्येनेनोपमा
नत्वेन स एव स्तोतुं शक्यः उपमानोपमेयभावस्य भिन्ननिष्ठत्वात् यदा तु श्येनेन स एव कोपि यागो विधीयते तदार्थ
वादेन श्येनेनोपमानेन तस्य स्तुतिः कर्तुं शक्यत इति श्येनशब्दः कर्मनामधेयं तद्व्यपदेशादिति उत्पत्तिविशिष्ट
गुणाबलीयस्त्वमपि च कर्मनामधेयत्वनिमित्तमिति केचित् यथा वैश्वदेवेन यजेतेत्यादौ उत्पत्तिविशिष्टा
ग्न्यादीनां बलीयस्त्वात् ह्यत्र वैश्वदेवपदस्य विश्वेदेवदेवताविधायकत्वं न संभवतीति कर्मनामधेयत्वं वस्तुतस्तु
तत्प्रख्यशास्त्राद्वास्य कर्मनामधेयत्वं प्रकृते तु यागो विश्वेदेवरूपगुणासंप्रतिपन्नप्राप्त्यार्थवादत स्त
स्यैव प्राप्तत्वात् यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वं पुरुषस्य निवर्तकं वाक्यं निषेधः निषे
धवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैवार्थवत्त्वात् तथा हि यथा विधिः प्रवर्तनां प्रतिपा
दयन् स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादेरिष्टसाधनत्वमाक्षिपन् पुरुषं तत्र प्रवर्तयति त
था न कलंजं भक्षयेदित्यादिनिषेधोपि निवर्तनां प्रतिपादयन् स्वनिवर्तकत्वनिर्वाहार्थं निषेध्यस्य क॥

मी॰ सा॰ लंजमदग्न्यास्य पुरोडाशविधिसाधनत्वमाक्षिपन् पुरुषं नतो निवर्त्तयति ननु निषेधवाक्यस्यैकार्थ्ये निवर्त्तनापत्ति
कौ॰ पादकृत्वमितिचेदुच्यते न तावदत्र धात्वर्थस्य नञर्थेनान्वयः अव्यवधानेऽपि तस्य प्रत्ययार्थभावनो
१२ पसर्जनत्वेनोपस्थितेः नह्यन्योपसर्जनत्वेनोपस्थितस्य अन्यत्रान्वय इति अत एव राजपुरुषमानयेत्या
दावविरोधः क्रियान्वयापत्तेः अतः प्रत्ययार्थस्यैव नञर्थेनान्वयः तत्रापि नाख्यातत्वांशवाच्या
र्थभावनायाः तस्याः लिङंशवाच्यप्रवर्त्तनोपसर्जनत्वेनोपस्थितेः किं तु लिङंशवाच्यप्रवर्त्तनाभावना
12 याः तस्याः सर्वविधेयप्रधानत्वात् नञ्श्रवणस्य भावार्थत्वसमभिव्याहृतपदार्थविरोधिबोधकत्व
व्यापारो नाश्नीयादावपिति पदसमभिव्याहृतो नञ् पदं स्वार्थविरोधिधर्मसत्त्वं गमयति तदिह लिङ्
समभिव्याहृतो नञ् लिङर्थप्रवर्त्तनाविरोधिनिवर्त्तनामेव बोधयतीति विधिवाक्यप्रवर्त्तकत्वं माप्रवर्त्तय
तीति प्रतीतेः तस्मान्निषेधवाक्यस्थले निवर्त्तनैव वाक्यार्थः यदा तु प्रत्ययार्थस्य तत्रान्वये बाधकं
तदा धात्वर्थस्यैव नञान्वयः तत्र बाधकं हि विधानस्य प्रत्ययस्य नमिति पुर्वकमो विकल्पप्रसक्तिः अत नवाक्ये द

राम

नैतस्य व्रतमित्युपक्रम्येतद्वाक्यपाठात् यथा चात्र पर्युदासाश्रयणं तथाहि व्रतशब्दस्य कर्त्तव्यार्थकत्वा
न्नस्य व्रतमित्यत्र स्नातकस्य व्रतानां कर्त्तव्यत्वेनोपक्रमात् किं तत्कर्त्तव्यमित्याकांक्षायां नेक्षेतोद्यंतमादि
त्यमित्यादिना कर्त्तव्यार्थ एव प्रतिपादनीयः अन्यथा पूर्वोत्तरवाक्ययोरेकवाक्यत्वं न स्यात् तथा च नञर्थे
न प्रत्ययार्थान्वयः कर्त्तव्यार्थानवबोधात् विध्यर्थप्रवर्त्तनाविरोधिनिवर्त्तनाया एव तादृशनञा बोधनात् तस्या
श्च कर्त्तव्यार्थत्वाभावात् तस्मान्नेक्षेतेत्यत्र नञा धात्वर्थविरोध्यनीक्षणसंकल्प एव लक्षणया प्रतिपाद्यते तस्य
कर्त्तव्यत्वसंभवात् आदित्यविषयकानीक्षणसंकल्पेन भावयेदिति वाक्यार्थः तत्र भाव्याकांक्षायामेतावता हेन
सा वियुक्तो भवतीति वाक्यशेषान्नगतः पापक्षयो भाव्यत्वेनान्वेति एवं च पूर्वोत्तरयोरेकवाक्यत्वं चिरंहत्येव नञा
त्र धात्वर्थविरोधिनः पदार्थान्तरस्यापि संभवात् कथमनीक्षणसंकल्पस्यैव भावनान्वय इति वाच्यम्
तस्य कर्त्तव्यताभावेन प्रकृते भावनान्वयायोग्यत्वात् द्वितीयं यजाति ये यजामहं करोति नानुयाजे
ष्वित्यादौ अत्र विकल्पप्रसक्त्यैव पर्युदासाश्रयणम् तथाहि अत्र वाक्ये नञर्थे प्रत्ययार्थान्वयः स्यात् तदा न
याजेषु ये यजामहे इति मंत्रस्य निषेधः स्यात् अनुयाजेषु ये यजामहं न कुर्यादिति स च प्राप्तिपूर्वक एव प्राप्त

मी॰ सा॰
लौ
१२
13

स्यैव निषेधात् प्राप्तिश्च यजतिषु ये यजामहं करोतीति शास्त्रादेव वाच्या शास्त्रप्राप्तस्य च प्रतिषेधे विकल्प एव न तु
बाधः प्राप्तिमूलरागस्यैव तन्मूलशास्त्रस्य शास्त्रांतरेण बाधायोगात् न च पदे जुहोतीति विशेषशा
स्त्रेणाहवनीये जुहोतीति शास्त्रस्येव नानुयाजेष्वित्यनेन यजतिषु ये यजामहं करोतीत्यस्य बाधः स्यादि
ति वाच्यम् परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात् परशास्त्रस्य हि स्वार्थविधानार्थ
माहवनीयशास्त्रानपेक्षत्वान्निरपेक्षत्वं प्रकृते तु निषेधशास्त्रस्य निषेध्यप्रसक्त्यर्थं यजतिषु ये यजाम
हमित्यस्यापेक्षणान्न निरपेक्षत्वम्, तस्माच्छास्त्रविहितस्य शास्त्रांतरेण प्रतिषेधो विकल्प एव स
च न युक्तः विकल्पे शास्त्रस्य पाक्षिकाप्रामाण्यापातात् न ह्यनुयाजेषु ये यजामह इत्यस्यानुष्ठानेना
नुयाजेष्वित्यस्य प्रामाण्यं संभवति व्रीहियागानुष्ठाने यवशास्त्रस्येव नहि अदृष्टकल्पना वा स्यात् वि
पि प्रतिषेधयोरप्यपुरुषार्थत्वात् अतोऽत्र न प्रतिषेधस्यार्थः किं त्वनुयाजसंबंधमात्रमित्यपर्यु
दासस्यैव इत्थं चानुयाजव्यतिरिक्तेषु

ये यजामहं इत्यनुवादेन तस्यानुयाजव्यतिरिक्तविषयकत्वं विधीयते यत् यजतिषु ये यजामहं करोति तत् अनु
याजव्यतिरिक्तेष्वेवेति नन्वेवं सामान्यमात्रप्राप्तस्य विशेषेऽसंकोचनरूपाउपसंहारस्य पर्युदासस्य भेदो न स्या
दिति चेन्न उपसंहारो हि तन्मात्रसंकोचनार्थः यथा पुरोडाशं चतुर्द्धा करोतीति सामान्यशास्त्रं चतुर्द्धाकरणमा
ग्नेयं चतुर्द्धा करोतीति विशेषादाग्नेयपुरोडाशमात्रे संकोच्यते पर्युदासस्तु तदन्यमात्रसंकोचार्थ इति ततो भेदा
त् क्वचिद्विकल्पप्रसक्तावप्यनन्यगत्या प्रतिषेधाश्रयणे यथा नातिरात्रे षोडशिनं गृह्णातीत्यादौ अत्र हि अतिरात्रे षो
डशिनं गृह्णातीति शास्त्रप्राप्तषोडशिग्रहणस्य निषेधाद्विकल्पप्रसक्तावपि न पर्युदासाश्रयणे प्रसंभवात् तथा
हि यद्यत्र षोडशिपदार्थेन नञर्थान्वयः तदातिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वाक्यार्थबोधकः स्यात् स च न सम्भ
वति अतिरात्रे षोडशिनं गृह्णातीति प्रत्यक्षविधिविरोधात् यदि चातिरात्रपदार्थेनान्वयः तदातिरात्रव्यतिरिक्ते षोडशि
नं गृह्णातीति वाक्यार्थबोधः स्यात् सोऽपि न संभवति तद्विधिविरोधात् अतो गत्यन्तराभावात् शास्त्रप्राप्तषोडशिग्रहणस्यैव
निषेधः न च विकल्पप्रसक्तिः तस्याप्याश्रयणीयत्वात् इयांस्तु विशेषो यद्विकल्पादेकप्रतिषेधेऽपि प्रतिषिध्यमानस्य

नानर्थहेतुत्वं विधिनिषेधोभयस्यापि क्रत्वर्थत्वात् यत्तु नविकल्पः प्राप्तिरागत एव प्रतिषेधस्तु पुरुषार्थः तत्र नि
मी॰सा॰ षिध्यमानस्यानर्थहेतुत्वं यथानृतोक्तस्त्रीगमनादेः तन्निषेधस्य क्रत्वर्थत्वेन तस्य क्रतुवैगुण्यसम्पादकत्वात् प्रा
२४ प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः तस्य लक्षणया प्रयोजनवदर्थपर्यवसानम् तथाहि अर्थवादवाक्यं हि स्वार्थ
प्रतिपादने प्रयोजनाभावाद्विधेयनिषिध्यमानयोः प्राशस्त्यनिन्दितत्वे लक्षणया प्रतिपादयति स्वार्थमात्रपरत्वे आनर्थ
14 क्यप्रसङ्गात् आम्नायस्य क्रियार्थत्वात् नचेष्टापत्तिः स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिना सकलवेदाध्ययनं कर्त
व्यमिति बोधयता सर्ववेदस्य प्रयोजनवदर्थपर्यवसायित्वस्य च यतः उपात्तत्वेनानर्थक्यानुपपत्तेः स द्विविधः वि
धिशेषो निषेधशेषश्चेति तत्र वायव्यं श्वेतमालभेत भूतिकाम इत्यादिविधिशेषस्य वायुर्वै क्षेपिष्ठा देवतेत्यादेर्विधेया
र्थप्राशस्त्यबोधकतयार्थवत्त्वं बर्हिषि रजतं न देयमित्यादिनिषेधशेषस्य सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमित्यादि नि
षेध्यनिन्दितत्वबोधकतयार्थवत्त्वे नच प्राशस्त्यादिबोधस्य निष्प्रयोजनत्वेनार्थवादस्यार्थवत्त्वमिति वाच्यम् आल
स्यादिवशादप्रवर्तमानस्य पुंसः प्रवृत्त्यादिजनकत्वेन तद्बोधस्योपयोगात् स पुनस्त्रेधा यदुक्तम् विरोधे गुणवादः
स्यादनुवादोऽवधारिते भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मत इति ॥

२४

सार्थः प्रमाणांतराविरोधेसत्यर्थवादोगुणवादः यथा आदित्योयूप इत्यादि यूपे आदित्याभेद
स्य प्रत्यक्षबाधितत्वादादित्यवदुज्वलत्वगुणो ऽनेन लक्षणया प्रतिपाद्यते प्रमाणांतराव
गतार्थबोधको ऽनुवादः यथाग्निर्हिमस्य भेषजमित्यादिः हिमविरोधित्वस्याग्नेः प्रत्य
क्षावगतत्वात् प्रमाणांतरविरोधतः प्राप्तिरहितार्थबोधकोर्थवादो भूतार्थवादः यथा इं
द्रो वृत्राय वज्रमुदयच्छदित्यादि एवं यजेत स्वर्गकाम इत्यादि निखिलवेदस्य साक्षात्परं
परया यागादिधर्मप्रतिपादकत्वं सिद्धं .... यदुद्दिश्य विहितस्तदुद्देशेनाक्रियमा
णस्तद्धेतुः ईश्वरार्पणबुध्या क्रियमाणस्तु निःश्रेयसहेतुः न च तदर्पणबुध्यानुष्ठाने प्र
माणाभावः यत्करोषियदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व
मदर्पणमिति भगवद्गीतास्मृतेरेव प्रमाणत्वात् स्मृतिवरणे तत्प्रमाणस्य श्रुतिमूलत्व

१५ लेनव्यवस्थापनादितिरेवं बालानांसुखवोधायभास्करेणसुमेधसा रचितोयंसमास
नजैमिनीयार्थसंग्रहः १ इतिश्रीमहोपाध्यायलौगाक्षिभास्कररचितपूर्वमीमांसार्थ
संग्रहनामकंप्रकरणंसमाप्तिमगाच्छुभमवर्धंसम ॥

15